Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्रीसुदर्शन-पण्डित-प्रत्युत्तरम्

वा

## भ्रमशोधकः

卐

—मङ्गलविजयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अर्हम् ॥

नमोनमः श्री प्रभुधर्मसूरये ।

# दर्शन-पण्डित-प्रत्युत्तरम्

वा

# भ्रमशोधकः

कर्त्ता

न्यायविशारद-न्यायतीर्थ-उपाध्याय

श्री मंगलविजयजी महाराज

प्रकाशक

हेमचन्द शवचन्द शाह

कलकत्ता ।

प्रथमावृत्तिः

१०००

वीर सं० २४६७ धर्म सं० १९ विक्रम सं० १९९७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ॐ अर्हं ॥

उल्लासकल्लोलिनी कर्त्तृ महाशयानां सुदर्शन पंडितानां जैन-तत्त्व-विषयक विचारप्रदर्शको-ल्लासकल्लोलिन्या प्रत्युत्तरम् वा भ्रम-शोधक ग्रन्थस्य संस्कृत पद्यमयस्य

रचयिता

जगत्पूज्य शास्त्रविशारद जैनाचार्य श्री विजयधर्मसूरीश्वर शिष्य न्याय-तीर्थ न्याय-विशारदोपाध्याय

मङ्गलविजयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# मुद्रापण साहाय्यम्

卐

बोथरा-कुल-चन्द्रेण, उदयचन्द्र चारुणा ।
धैर्योदार्यगुणाढ्येन, धर्मकार्यविधायिना ॥१॥

कल्लोलिन्याश्चभ्रान्तिनां, शोधको भ्रमशोधकः ।
तस्य मुद्रापणे द्रव्य-साहाय्यं तेन स्वीकृतम् ॥२॥

गुरूणामुपदेशस्तु, शिरोधार्य सदा तव ।
ग्रन्थप्रचारकर्तॄणां, ज्ञानाऽऽवारक्षयः फलं ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अर्हम् ॥

नमोनमः श्री प्रभुधर्मसूरये ।

# सुदर्शन-पण्डित-प्रत्युत्तरम्

वा

# भ्रमशोधकः

## मंगलाचरणम्

*जैनं जयति शासनम्*

सुशान्ति मार्गे वरयान तुल्यम्,
प्रणाशकं सर्वदुर्वादिदर्पम् ।
मतं जिनानां शरणं बुधानाम्,
नमामि नित्यं त्रिजगत्प्रधानम् ॥ १ ॥

वन्दित्वा पार्श्वदेवेशं धर्मसूरिं गुरुं तथा ।
सुदर्शनस्य भ्रान्तीनां निरासः क्रियते मया ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दाक्षिणात्यो महाभागो भूतपूरी निवासकः।
सुदर्शनाऽभिधेयश्च ग्रन्थं च कृतवान् खलु ॥ १ ॥
कल्लोलिनी च यस्याख्या वर्तते पुस्तकस्य च।
बहु भ्रान्तिश्च जैनेषु कृता तेन मनीषिणा ॥ २ ॥
तदर्थं क्रियते यत्नः दर्शनभ्रमशोधकः।
कासांचिच्चैव भ्रान्तीनां निरसनं विधीयते ॥ ३ ॥

जैनधर्मविषयकमान्यता तेन या दर्शिता सा अक्षरशोऽत्र लिख्यते।

१—आर्हतोऽपि जगत्सर्वं कार्यकारणरूपेण नित्यानित्य सत्यासत्य भिन्नाभिन्नात्मकम्।

२—आत्मानः कर्माऽनुगुण शरीर परिणाम परिमाणाः।

३—अनादिसंसारः।

४—मलधारणाऽऽत्मज्ञानादिभिः प्रकृतिविनिर्मोकादूर्ध्वगति प्राप्तिर्मोक्ष इति जैनसिद्धान्तस्तेन प्रतिपादितः।

आर्हतेति च संप्रोच्य यदुक्तं तदसत्यकम्।
जैनशास्त्रे च तादृक्षी मान्यता नैव विद्यते ॥ ४ ॥
कस्य चिज्जैन शास्त्रस्य दत्तं नैव प्रमाणकम्।
अप्रमाणिक वादोऽयं जैनसिद्धान्तसंमतः ॥ ५ ॥
जैनैस्तादृक् च नो प्रोक्तं कथं मिथ्या विधीयते।
मिथ्यावाद प्रवक्तव्ये दोषाऽवकाशता भवेत् ॥ ६ ॥
जगत्सर्वं च जैना वै गदन्ति नैव तादृशम्।
अपितु द्रव्यपर्यायरूपं जैनेश्च मन्यते ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्यकारणरूपं च प्रोक्तं न जैनशासने।
अपितु बौद्ध राधान्तः कुतोऽत्र परिदर्श्यते॥ ८॥
नित्यानित्यस्वरूपं च बौद्धैर्न स्वीकृतं कदा।
कार्यकारणकं यत्र तत्र नित्यादिकं नहि॥ ९॥
सर्वथाऽसत्यरूपं तु खपुष्पं परितिष्ठति।
शून्यवादिगृहे तच्च अन्यत्र नैव संमतम्॥ १०॥
परस्परं च कार्यकारणता क्षणिके मता।
जैनेषु नैव तादृक्षं सर्वथा संमतं खलु॥ ११॥
जैन बौद्धस्य सिद्धान्तावलोकनं कृतं न चेत्।
कथं तर्हि तदीयानां मान्यता दर्शिता त्वया॥ १२॥
भेदज्ञानं विना कृत्वा लेखिनी चोद्यता तव।
अतएव च हास्यावकाशता जायते नृणाम्॥ १३॥
जड़चेतन मध्ये च सर्वथा भिन्न रूपता।
अनादिकालिकी ज्ञेया तत्र नोऽभिन्नतामता॥ १४॥
जड़चेतन रूपं च जगज्जैनैर्निगद्यते।
तत्र खपुष्प सादृक्षी अभिन्नता प्रकीर्त्तिता॥ १५॥
उपयोगस्वरूपाः स्युः आत्मानो जैनदर्शने।
कर्मानुगुण इत्यादि जैनेषु नैव सर्वथा॥ १६॥
एकान्तकर्मवादश्च मीमांसकेषु संमतः।
पञ्चकारणवादोहि संमतो जैनशासने॥ १७॥
सिद्धात्मसु च नो तादृक् कर्माभावाच्च सर्वथा।
शरीरस्यापि नो सत्ता तत्र केनापि रूपतः॥ १८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतस्तल्लक्षणं नैव सिद्धात्मनि प्रयुज्यते।
अव्याप्त्यादिक दोषेण दुष्टं तत्परिज्ञायताम्॥ १९ ॥
मलधारणद्वारा च मुक्तिर्नो जैनशासने।
सम्यग्ज्ञानक्रियाभ्यां[1] च मुक्तिस्तु जैनसंमता॥ २० ॥
मलधारणकर्त्तव्ये यदि मुक्तिश्च संभवेत्।
तदाऽघोरि मनुष्याणां प्रथमा परिजायते॥ २१ ॥
मलधारणरूपं तत् कथं मुक्तेश्च कारणम्।
निरूपितं त्वया जैने वन्ध्यापुत्रसमं खलु॥ २२ ॥
निर्मोकता प्रकृत्याश्च चोर्ध्वगतौ न हेतुता।
[2]ऊर्ध्वगप्राप्ति मात्रत्वं मोक्षो नैवाभिधीयते॥ २३ ॥
प्रकृतेर्मान्यता चैव सांख्यदर्शनसंमता।
महत्तत्त्वादितत्त्वानामुत्पत्ति कारणं खलु॥ २४ ॥
महत्तत्त्वादितत्त्वानां वेदान्तसांख्यमान्यता।
जैनेषु प्रकृत्यादीनि तत्त्वानि सन्ति नैव च॥ २५ ॥
कृत्स्नकर्मक्षयाच्चैव मोक्षस्तु जैनसंमतः।
अनन्तसुखसंवेद्यं [3]ज्ञानादिकं तथैव च॥ २६ ॥
सर्वथाऽनादि संसारः जैनैर्नैव निगद्यते।
द्रव्यतोऽनादि संसारः पर्यायेण न संमतः॥ २७ ॥

---

१ प्रोक्तं च तत्त्वार्थ सूत्रे प्रथमाऽध्याये प्रथमसूत्रं सम्यग्दर्शनज्ञान चारित्राणि मोक्षमार्ग इति।

२ ऊर्ध्वगति प्राप्ति।

३ ज्ञानाद्यनन्त चतुष्टय रूपत्वे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किंच सिंहावलोकं च कार्यकारणतादिके।
क्रियते जड़चैतन्ये घटते नैव तादृशम् ॥ २८ ॥
चैतन्यस्य न हेतुत्वं जड़तायां विभाव्यते।
कार्यताऽपि न तत्रैव केन रूपेण संमता ॥ २९ ॥
जड़ोत्पत्तेश्च हेतुत्वं चैतन्ये नैव संभवेत्।
कार्यताऽपि न तत्रैव केन रूपेण संमता ॥ ३० ॥
यदि चैतन्यतत्त्वेच कार्यता मन्यते मया।
तदा जड़स्य कार्यत्वे चैतन्ये जड़ता भवेत् ॥ ३१ ॥
यादृशं कारणं यत्र कार्यं तादृक्च जायते।
जड़कारणतायां वै चैतन्ये जड़ता खलु ॥ ३२ ॥
यदि चैतन्यतत्त्वेषु नित्यत्वं नैव मन्यते।
तदा जैनैः कथं तर्हि योगादिकं च पाल्यते ॥ ३३ ॥
अत्यन्ताभावसम्बन्धो जड़चैतन्ययोर्मतः।
कार्यकारणता तर्हि कथं जैनैः प्रदर्श्यते ॥ ३४ ॥
दानतपः किमर्थं वै क्रियते फललिप्सुना।
वन्ध्यापुत्रसमा चैव तादृशी मान्यता जिने ॥ ३५ ॥
कथं मिथ्या समारोपः त्वया जैने विधीयते।
जैनदर्शनज्ञानस्य शून्यता त्वयि भाव्यते ॥ ३६ ॥
जैनदर्शनशास्त्राणामभ्यासं च कृतं न चेत्।
खण्डनं च कथं तर्हि विदुषा परितन्यते ॥ ३७ ॥
शुष्ककथाऽनुसारित्वं भवतां नैव युज्यते।
धर्मवादाऽनुसारेण वक्तव्यं हि भवादृशैः ॥ ३८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विमर्शकं समुद्दिश्य लिखितं भवता खलु।
तत्सर्वं युक्तिहीनत्वं प्रमाणेन प्रदर्श्यते ॥ ३९ ॥
वेदविषयज्ञानस्य भवतोऽभावश्च सर्वथा।
शंकरादिक[1]विज्ञानां कृतिमुद्दिश्य तत्त्वतः ॥ ४० ॥
लिखितं स्वीय सद्ग्रन्थे नूतनं न कृतं त्वया।
महावीरत्वनामाऽऽख्यः जैनधर्म प्रवर्तकः ॥ ४१ ॥
प्रतिमादि गुणैर्युक्तः आद्यस्तद् धर्मदेशकः।
अपरो नैव ज्ञातव्यः एवकारेण बोध्यते ॥ ४२ ॥
कूपमण्डूकता तेन वाक्येन परिदर्शिता।
नहि स्वकीय सिद्धान्तः स्वयं कदाऽपि वीक्षितः ॥४३॥
ऋगवेदादि शास्त्रेषु मंत्रा जैनत्वद्योतकाः।
शतशः परितिष्ठन्ति नेत्रमुन्मूल्य दृश्यताम् ॥ ४४ ॥
ऋषभादिजिनेन्द्राणां सुमतिजिनस्वामिनाम्।
श्री श्रेयांसप्रभूणां चारिष्टनेमिजिनस्य वै ॥ ४५ ॥
वर्धमानमहावीरप्रभूणां नामपूर्वकाः।
बाढं मंत्राश्च तिष्ठन्ति त्वच्छास्त्रं दृश्यतां त्वया ॥४६॥
एवं तीर्थंकराणां च भरतादि चक्रवर्तिनाम्।
मंत्राणां विद्यमानेऽपि कथमाद्यः स देशकः ॥ ४७ ॥
प्रथम [2]आदिदेवः स्यात् सुमतिश्च पञ्चमो मतः।
श्रीश्रेयांसप्रभुश्चैव एकादशतमः खलु ॥ ४८ ॥

---

१ शंकराचार्यादि।

२ तेषु कतिचिच्छ्लोका जैनत्व द्योतकाः सन्ति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अरिष्टनेमिनाथश्च द्वाविंशतितमः स्मृतः ।
वर्धमानजिनेन्द्रश्च चतुर्विंशतिसंख्यकः ॥ ४६ ॥
वर्धमानस्य पूर्वेऽपि त्रयोविंशतिसंख्यकाः ।
तेषां वेदेषु नामानि कतिचित्सन्ति पूज्यतः ॥ ५० ॥
कथं तर्हि महावीरः जैने चाद्यप्रवर्तकः ।
अतो विचार्य वक्तव्यं परमन्तव्यतत्त्वकम् ॥ ५१ ॥
श्रीमद् भागवते ग्रन्थे योगवाशिष्टशास्त्रके ।
महाभारतपौराणे श्लोका जैनत्व द्योतकाः ॥ ५२ ॥
वेदरहस्यग्रन्थे च व्याख्याताः कतिचिन्मया ।
ततोऽपि ते च ज्ञातव्याः भ्रान्तिनिरासकांक्षिणा ॥ ५३ ॥
वेदात्प्रागपि नो चेत्ते तर्हि तन्नामता कथम् ।
अतस्ततोऽपि प्राचीनाः सर्वे तीर्थंकरा मताः ॥ ५४ ॥
अनादिता च वेदेषु यदि त्वया निगद्यते ।
दोषाऽवकाशता तत्र प्रत्यक्षेण विलोक्यताम् ॥ ५५ ॥
ऋषभादिप्रभूणां च सादित्वं स्वीकृतं समैः ।
कथं तेऽपि समायाताः अनादि वेद शास्त्रके ॥ ५६ ॥
तद्दोषस्य निरासाय तेषां यदि च नित्यता ।
तदा तेषां पितॄणां च पुत्राणां संभवः कथम् ॥ ५७ ॥
चतुर्विंशति तीर्थंकराणां च स्वीकृतिर्यदि ।
तदा तेषु च मध्ये वै प्राथम्यमादिनाथके ॥ ५८ ॥
श्रीमद्भागवते चैव अतएव निरूपितम् ।
एकादशासु स्कन्धेषु ग्रन्थं निष्कास्य दृश्यताम् ॥ ५६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तर्हि कथं महावीरे प्रथमं तत्प्रवर्तनम्।
भवद्भिर्लिखितं तद्धि युक्तिप्रमाणशून्यतः॥ ६० ॥
अन्तिमस्तु महावीरो भगवान् जैनसम्मतः।
यद्याद्यश्च महावीरः मन्यते हि भवादृशैः॥ ६१ ॥
तदा वेदादि शास्त्रेषु ऋषभाद्याः कथं मता।
जैनशास्त्रेषु सर्वत्र क्रमतः प्रतिपादिताः॥ ६२ ॥
यदि तत्र न प्रामाण्यं वेदेषु तत्कथं भवेत्।
युक्तिप्रमाणराहित्ये वक्तव्ये न विवेकता॥ ६३ ॥
एतत्कालं समुद्दश्य प्रवर्तकत्वमुच्यते।
तदा त्वयाऽपि मन्तव्यं आद्यत्वमृषभे जिने॥ ६४ ॥
महावीरोऽन्तिमो ज्ञेयः युक्तिः युत्त्या विचारणे।
असंबन्धत्वदोषो हि अतएव निवर्तते॥ ६५ ॥
अपेक्षया च प्रोक्तं तत् विवादस्तत्र नो भवेद्।
अथवाऽनादिता जैने पारंपर्यानुयोगतः॥ ६६ ॥
आस्तिकनास्तिक्य चर्चा वादोऽपि नैव चर्चितः।
परन्तु हार्दिको भावो वेदाऽनुयायिनस्तव॥ ६७ ॥
वेदाऽनुयायि व्यक्तौ च यद्यास्तिक्यं निगद्यते।
तदा जैमिनि भक्ता ये घोरहिंसाविधायकाः॥ ६८ ॥
त एव चास्तिका ज्ञेया वेदशास्त्रावलम्बतः।
ये वेदविहिता यज्ञाः कुर्वन्ति ते च सर्वदा॥ ६९ ॥
वरं वराकाश्चार्वाकाः ते तु प्रगट नास्तिकाः।
वेदोक्तितापसच्छद्मच्छन्नं रक्षो न जैमिनिः॥ ७० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेदे हिंसात्व प्राबल्यं मखाऽनेक विधानतः।
गोमेधनरमेधाऽश्वमेधादीनां निरूपणात्॥ ७१॥

जलस्थलचराणां च जीवानां वै विधानकम्।
यज्ञार्थं परिदृश्यते अकुर्वन् ते तथैव च॥ ७२॥

न तु सांख्यादि मन्तव्ये वेदान्तिके च नो तथा।
किन्तु मीमांसकैः सर्वैः शाक्तानुयायिभिस्तथा॥ ७३॥

त एव चास्तिका वाच्याः भवद् वेदानुसारतः।
नास्तिकाश्च परे सर्वे वेदहिंसानिषेधकाः॥ ७४॥

पाणिनिसूत्रयोगेन आस्तिक्यं यदि चर्च्यते।
आत्मस्वर्गादि मन्तॄणां मोक्षतत्त्वानुगामिनाम्॥ ७५॥

सर्वेषा मपि तेषां वै सांख्यदर्शनकादीनाम्।
आस्तिक्यं विद्यते युक्त्या शान्तचित्तेन बुध्यताम्॥ ७६॥

ततश्च नास्तिक वादोऽपि चार्वाके शोभते सदा।
न तु सांख्यादिके स्वान्ते बौद्धादिकविभागके॥ ७७॥

प्रोक्तश्च नर्मदाशंकर कविना—

नास्तिक्यं वेद धर्म्मे जिनवर सुमते सर्वमिथ्यात्वभावः।
कौसंग्यं चौद्धवीये भुवने सुविदिते वैष्णवेऽनाश्रयत्वं॥
सामाजेऽनार्यता यत्प्रचलितपरमं म्लेच्छके काफरत्वं।
सर्वाधःपातकारी प्रसरति भयदो भारते भेद भावः। ७८।

द्वेष बुद्ध्या परेषां वै नास्तिक्यं नैव जल्प्यताम्।
यदि विशुद्धरूपेण आस्तिक्यं चर्च्यते त्वया॥ ७९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदा केवल जैनेषु अहिंसा शुद्धयोगतः ।
आस्तिक्यं परितिष्ठेत अन्यत्र नाममात्रकम् ॥ ८० ॥
अहिंसादि यमादीनां नान्यत्र सम्भवः खलु ।
एकान्तनित्यतावादे अनित्यैकान्तवादके ॥ ८१ ॥
भवादृशाश्च विद्वांशः प्रज्ञाशक्तिसमन्विताः ।
परेषां भ्रांति गर्त्तेषु पातयन्ति कथं नु भो ॥ ८२ ॥
यदि तत्कार्यकर्त्तव्ये पुरुषार्थः प्रयुज्यते ।
तदा तत्प्रतिकाराय लेखनी चोद्यता मम ॥ ८३ ॥
अतएव च सन्मार्गो गोमव्यो न भवादृशैः ।
परलोकादि मन्तारः आस्तिकाश्च समे मताः ॥ ८४ ॥

श्रुतकेवलित्व पदवी न भवेत्

श्रुतकेवलिता पदवी जैनेषु नैव कीर्त्तिता ।
दृष्टिवादस्य पाठेन अपितु श्रुतकेवली ॥ ८५ ॥
तथा तत्पूर्णपाठेन देशना केवली समा ।
यत्र श्रुतस्य पूर्णत्वं स एव श्रुतकेवली[1] ॥ ८६ ॥
जैनदर्शनज्ञानस्य शून्यत्वात्कल्पितं तथा ।
नैव युक्ति प्रमाणानां स्वल्पत्वं तत्र विद्यते ॥ ८७ ॥
देवमनुष्यजीवानां प्रीतिसंपादकत्वतः[2] ।
इति हेतुर्न वक्तव्यः अहिंसाधर्मसाधने ॥ ८८ ॥

---

१ तत्रैव श्रुतकेवलिता मता ।

२ शुद्धात्म स्वरूप प्रकाशकत्व हेतौ तु तादृग् दोषो नास्त्येव कुतो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहिंसासंयमे चैव तपो रूपे च धर्मता।
आत्म स्वरूपता तत्र हेतुत्वे न विधीयेते॥ ८९॥

यस्य धर्मे सदा स्वान्तं नमन्ति तत्र देवता।
ततो बाह्य लाभः स्यादुपद्रवस्य शान्तिता॥ ९०॥

अपरेषां तु का वार्ता देवानां नमने सति।
परे च नामिता एव इति मनसि बुद्ध्यताम्॥ ९१॥

जैनशास्त्रविरुद्धं ये मन्यन्ते पक्षपातिनः।
देवप्रियैर्नरैः पूज्याः ते नो ज्ञेयाः कदाचन॥ ९२॥

तं नो देवा नमस्यन्ति असन्मार्गावलम्बतः।
पलादास्तान्नमस्यन्ति न तु विशुद्धदेवताः॥ ९३॥

वेदविहितहिंसायाः कारणं श्वसुरं प्रति।
जामातारो नमस्यन्ति इत्यपि नैव युक्तिमत्॥ ९४॥

यज्ञक्रियाविधानेन देवांश्च प्रीणयन्ति ते।
इति मिथ्या वचश्चैव श्रोतव्यं नैव कर्हिचित्॥ ९५॥

देवपूजास्वरूपश्चेत् यज्ञो हिंसानिषेधकः।
इत्यर्थे चैव कर्त्तव्ये विवादो विद्यते नहि॥ ९६॥

पश्वादिहोमरूपश्च किन्तु यज्ञः प्ररूपितः।
अतोऽहिंसा स्वरूपश्च यज्ञो नैव कदाचन॥ ९७॥

---

यमादि योगांगद्वाराऽऽगम्यमान नूतनकर्मनिरोधेन पुरातनस्य निर्जरया शुद्धाऽऽत्मस्वरूपं प्रकटीयते शुद्धात्म प्रकाशत्व हेतौ तु तादृग् दोषो नास्ति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अवध्यादिज्ञाननिरूपणे मिथ्यारूपता प्रदर्श्यते—

अवध्यादिक ज्ञानानां शुद्धं रूपं न कीर्त्तितम् ।
पारिभाषिकशब्दानां सर्वथा ज्ञानशून्यतः ॥ ९८ ॥
अतएव च जैनानां समीपे पठनं वरम् ।
पश्चात् खलु प्रवक्तव्ये दोषता नैव संभवेत् ॥ ९९ ॥

## अवधिज्ञाननिरूपणं—

अनुभवानुसारेण अस्माकं बोधता च या ।
अवधिरूपज्ञानं तत् इति तेषां मतिः किल ॥ १०० ॥

## मनःपर्यायनिरूपणं—

पठनानन्तरं चान्याऽभिप्रायस्य वेदनम् ।
मनः पर्यायज्ञानं तत् जैनैरित्यपि मन्यते ॥ १०१ ॥
वन्ध्यापुत्रस्वरूपं तत् सुदर्शनैर्निरूपितम् ।
सर्वथा मानशून्यत्वे निरूपणं न युज्यते ॥ १०२ ॥
अवध्यादिकज्ञानानां स्वरूपं ज्ञानबिन्दुषु ।
तत्त्वार्थसूत्रवृत्त्यादौ विशेषावश्यके खलु ॥ १०३ ॥
नन्दिसूत्रादिके चैव जैन तत्त्व-प्रदीपके ।
एवमनेकशास्त्रेषु निरूपितं विशेषतः ॥ १०४ ॥
अवलोकं विना कृत्वा शंकरस्वामिवत्त्वया ।
यदि च लिख्यते विद्वन् उत्तरं तु मीलिष्यति ॥ १०५ ॥
स्थानांगसूत्रकृत्सूत्रे अंगाख्ये प्रकीर्त्तिते ।
सुधर्मस्वामि संदब्धे श्रुत्वा प्रभुमुखामतः ॥ १०६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तिप्रमाणपूर्वेण व्याख्यातं शीलसूरिभिः।
शंका समाधिता तत्र दर्शिता वै प्रमाणतः॥ १०७ ॥
सूत्रकृत्सूत्र मध्येच सांख्यादि दर्शनं तथा।
आदिदेवोपदेशश्च वैतालीय विभागके[1] ॥ १०८ ॥
नरकस्त्रीविभक्तिश्च नारक दुःखवीक्षणम्।
विशेषतोऽत्र संप्रोक्तं सार्वीय दृष्टिवेदिभिः॥ १०९ ॥
अन्यमतीय प्रश्नाश्च प्रोक्ता वै चेन्द्रभूतिना।
उत्तराः शमभावेन कीर्त्तिता जिनभास्करैः॥ ११० ॥
अनेकवस्तुबोधश्च स्पष्टरूपेण जायते।
बोधाच्चारित्रसंप्राप्तिः ततः कर्मक्षयो ध्रुवम्॥ १११ ॥
स्थानांगे चैकमारभ्य दशपर्यंतवस्तुनः।
त्रैकालिकपदार्थानां तन्मध्ये च निरूपणम्॥ ११२ ॥
आक्रोशलेशता नैव मोहाभावे च सर्वथा।
अध्यात्मवादप्राचुर्यं धर्म भाव प्रकाशकः॥ ११३ ॥
न्यायशास्त्रानु[2] कारित्वं चरकस्य तथैव च।
इत्युक्तिर्बालिशानां च नैकत्र्ये परिशोभते॥ ११४ ॥
एकदेशीयता तत्र अत्रैव सार्वदैशिकम्।
तत्र शुष्कविवादश्च अत्र चाध्यात्मदेशना॥ ११५ ॥
तस्य साम्यत्व संवादः कदाचिन्नैव युज्यते।
हस्तिरासभयोश्चैव कथं साम्यं निगद्यते॥ ११६ ॥

---

१ अध्ययने।

२ गौतमीय न्यायदर्शनानुकरणं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुराणे ते च सूत्रे द्वे अर्वाचीना च संहिता।
न्यायसूत्रं ततः पश्चात् कथं साम्यं विभाव्यते ॥ ११७ ॥
वैदकरूपता तत्र नैक रोगचिकित्सनम्।
अनेकारंभसंयुक्तं चरकं परिभाव्यताम् ॥ ११८ ॥
तयोः केन प्रकारेण साम्यत्वं तेन साधितम्।
तत्तु स एव जानाति बुद्धि शून्यत्व योगतः ॥ ११९ ॥
विना विचार्य वक्तव्यं पण्डितानां न शोभते।
शंकरस्वामिभाष्यं हि यथा हास्यास्पदं महत् ॥ १२० ॥
जैनदृष्टिमविज्ञाय लिखने दोषता बहु।
आधुनिकाश्च विद्वांसः हास्यं कुर्वन्ति सर्वथा ॥ १२१ ॥
कीयत्य ज्ञानता तेषां जैनदृष्टिनिरासने।
प्रतिपादनशैली च प्रामाण्यरहिता सदा ॥ १२२ ॥
अनन्तावयवा—जीवे नो मता जैनदर्शने।
कथं शंकर स्वाम्यादि संन्यासिना निरूपिताः ॥ १२३ ॥
त्रिविधजीवभेदाश्च नित्य सिद्धादि रूपतः।
सर्वत्र जैनशास्त्रेषु तादृक्षानैव कीर्त्तिताः ॥ १२४ ॥
पुद्गलास्तित्स्व कायानां षोढ़ात्वं तैर्निरूपितम्।
चत्वारि चैव भूतानि स्थावरं जंगमं तथा ॥ १२५ ॥
खपुष्पसदृशं जैने तत्सर्वं परिकीर्तितम्।
जैनदर्शनज्ञानस्य सर्वथा तत्राभावता ॥ १२६ ॥
धर्मास्तिकायतत्त्वस्य व्याख्याऽपि तादृशी खलु।
अधर्मास्तित्वकायत्वं यत्र तत्रैव मोक्षता ॥ १२७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतत्सर्वस्य दुष्टत्वं तत्त्वाऽऽख्याने[1] प्ररूपितम् ।
द्रष्टव्यं तत्समुद्घाट्य सत्यमार्गगवेषकैः ॥ १२८ ॥
अनभिज्ञत्व रूपा सा चेष्टा शंकरस्वामिनाम् ।
अन्य दृष्टिं विना दृष्टवा लिखने नैव प्रौढिमा ॥ १२६ ॥
सर्वेषां दर्शनानां च युक्तियुक्त्या विवेचनम् ।
निरसनं च सद्युक्त्या तत्त्वाऽऽख्याने विभाव्यताम् ॥१३०॥
तत्तद्दर्शनशास्त्रस्य विलोकनं विशेषतः ।
कृत्वा च न्यायतीर्थेन प्रतिवादः समादृतः ॥ १३१ ॥

॥ ॐ शान्तिः शान्तिः ॥

१ भावनगर यशोविजय ग्रन्थ मालायां मुद्रितं वर्त्तते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# लघुप्रशस्तिः

रघुनाथपुरे रम्ये, मानभूमप्रदेशके।
नैकभद्रजनाकीर्णे, नैक विद्यालयैर्युते ॥ १ ॥
जैनानां तत्र प्राचुर्यं, प्राक्काले वङ्गभूमिषु।
अनेकमन्दिराणां च, प्रादुर्भावो विधीयते ॥ २ ॥
विशालजैनमूर्तीनां, प्राकट्यमधुनापि च।
अतः सराकजातीनां, चोद्धृत्यै यत्नता खलु ॥ ३ ॥
महानविद्यालयश्चात्र, स्थापितो जैनपुङ्गवैः।
मंगलादिकसाधूनामुपदेशप्रभावतः[1] ॥ ४ ॥
जनानामानुकूल्यं च, बहुधा परिविद्यते।
अतस्तदुपकाराय, श्राद्धैर्धन व्ययीकृतः ॥ ५ ॥
श्राद्धादि गुणयुक्तानां, सींघीय गोत्रताजुषाम्।
बहादूरस्य[2] चौदार्यात्, जातं कार्यं महत्तरम् ॥ ६ ॥
गुरु श्री धर्मसूरीणां, ममोपरि कृपा सदा।
अतस्तत्कार्य कर्त्तव्ये यत्नः कथं न तन्यते ॥ ७ ॥

---

१—मंगलविजय-प्रभाकरविजयः।

२—बहादूरसिंहजी सिंघी।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवयुवक प्रेस,
३, कमर्सियल बिल्डिंग्स्
कलकत्ता।

For Private And Personal Use Only